श्री गणेशाय नमः हरिः ॐ मंदारकल्पहरिचंदनपारि
जालमध्येशशांकमणिमंडपवेदिसंस्थे अर्द्धेंदुमौलिसु
ललाटषडर्द्धनेत्रे भिक्षांप्रदेहि गिरिजेक्षुधितायमह्यं १
केयूरहारकटकांगद कर्णपूर कांचीकलाप मणिकांति
लसद्दुकूले दुग्धान्नपूर्णवरकांचनदर्विहस्ते भिक्षां प्र०
२ आलीकदंबपरिसेवितपार्श्वभागे शक्रादयो मुकलि
तांजलयः पुरस्तात् देवी त्वदीयचरणौ शरणं प्रसन्नं भि
३ गंधर्वदेवऋषिनारदकौशिकात्रिव्यासांबरीषकलशोद्भ
वकश्यपाद्याः भक्त्या स्तुवंति निगमागमसूक्तमंत्रैः भि०

1

४ लीलावचांसि तव देवि रुगादिवेदैः सृष्ट्यादिकर्मरचना भवदीयचेष्टा त्वत्तेजसा जगदिदं प्रतिभाति नित्यं भि० ५ शङ्खासिके शशिकलाभरणार्द्धदेहं शंभोरुरुस्थलनिचेतननित्यवासे दारिद्र्यदुखभयहारिणि का त्वदन्ये भि० ६ संध्यात्रये सकलभूसुरसेव्यमाने स्वाहास्वधासि पितृदेवगणार्त्तिहंत्री जायासुता परिजनान्तलयोन्नकामान् भि० ७ सद्भक्तकल्पलतिके भुवनैकवंद्ये भूतेश हृत्कमलमग्नकुचाग्रभृंगैः कारुण्यपूर्णनयने किमुपेक्षसे मां भि ८ अंब त्वदीयचरणांबुज

१

१

संश्रिताया ब्रह्मादयोप्यविकलां श्रियमाश्रयंते तस्मादहं तव नतोस्मि पदारविंदं भि० ९ एकाम्रमूलनिलयस्य महेश्वरस्य प्राणेश्वरि प्रणतभक्तजनाय शीघ्रं कामाक्षि रक्षितजगत्त्रितये अन्नपूर्णे भि० १० भक्त्या स्तुवंति गिरिजा दशकं प्रभाते मोक्षार्थिनो बहुजनाश्चित्तयोन्नकामान् प्रीता महेशवनिता हिमशैलकन्या तेषां ददाति सुतरां मनसेप्सितानि ११ इति श्रीशंकराचार्यविरचितं अन्नपूर्णादशकं संपूर्णं ॥

ब्रह्मोवाच जयनित्यपरानंद जगद्योने नमो नमः नमः सत्यवते

तुभ्यंविष्णुरूपायतेनमः १ तामसेशिवरूपाय गुणातीता
यतेनमः स्वहास्वधावषट्कारविश्वरूपायतेनमः २ तंउवा
च ततोब्रह्मास्तुवेवंतेजसांनिधिं करुणांकुरुदेवेशदुःखि
तस्यममप्रभो ३ इहापिसृष्टिकार्येपिविघ्नात्वाममप्रभो
इदानींरक्षमांदीनंअनाथंशरणागतं ४ इतिब्रह्माकृतंगण
पतिस्तवंसंपूर्णं ५ देवाऊचुः यस्त्वत्तयाखिलमिदंब्रह्मा
विष्णुश्चराचरं यतोग्निरापःपृथिवीवायुराकाशमेवच आ
दित्यःचंद्रमास्वर्गोनक्षत्राणिदिशोदश पर्वताःसरितोयक्षा
नागारक्षांसिगुह्यकाः २ मनुष्याःपशवोगावोनानाभूताश्च

२

जंतवः उत्पत्तिस्थितिसंहारान्प्राप्नुवंति नताःस्मृतं ३ गुणत्र
यत्रिसूत्रायगुणातीतायतेनमः अनेकोदरसंस्थायानादिसि
द्धायतेनमः नानारूपभृतेतुभ्यंभक्तसंरक्षकायच ४ दैत्य
संतप्तमनुजःदुखंनाशयतेनमः ब्राह्मणानांविनाशायसिंदू
रोधर्मलुप्तये ५ अस्माकंदुःखहेतुश्च त्वयायंनिर्मितः कथं
दीनानांत्वमनाथानांनाथश्चागीयसेखिलैः अतोस्मात्र
क्षदेवेशसिंदुरस्यविनाशनात् करुणोदीरितंश्रुत्वादेवानां
जगदीश्वरः सुप्रीतोदेवसंस्तुत्याविरासीत्सविनायकः
गणपतिरुवाच उवाचनमतोदेवानिदंश्रोत्रंप्रियंमम ८

३

३

यः पठेत् परया भक्त्या तस्य दुःखं न विद्यते दुःखप्रशमनं नाम
स्तोत्रमेतन्मयोदितं ९ शृणुयात् श्रावयेद्यस्तु चतुर्थ्यां पुरतो मम
तस्य दुःखं च रोगं च हनिष्ये परमापदः १० दास्ये च परमप्री
तः कामान्यर्थान्यदेप्सितान् अहं गौरीसुतो भूत्वा सिंदूरह
न्मि सांप्रतं ११ गजानन इति ख्यातिं यास्यामि हि त्रिविष्टपे ५
स्थानानि च प्रदास्यामी हत्वा दुःखं तुतन्मयोकृतं इती श्रीस्कंदपु
राणे गणेश माहात्म्ये गण पति स्तवं संपूर्णं ॥ छ ॥ ० ॥ श्रीम
गणेशाय नमः मार्कंडेय उवाच नारायणं सहस्राक्षं प

३

द्मनाभं पुरातनं प्रणतोस्मि हृषीकेशं किं मे मृत्युः करि

ष्यति १ गोविंदं पुंडरीकाक्षमनंतमजमव्ययं केशवं
च प्रपन्नोस्मि किं मे० २ वाराहं वामनं विष्णुं नरसिंहं ज
नार्दनं माधवं च प्रपन्नोस्मि किं मे० ३ वासुदेवं जगद्यो
निं भानुमंतमतींद्रियं दामोदरं प्रपन्नोस्मि किं मे मृ० ४
शंखचक्रधरं देवं छंदोरूपिणमव्ययं अधोक्षजं प्रप
न्नोस्मि किं मे मृ० ५ पुरुषं पुष्करं पुण्यं क्षेमबीजं जगत्प
त्तिं लोकनाथं प्रपन्नोस्मि किं मे मृ० ६ भूतात्मानं म
हात्मानं यज्ञयोनिमयोनिजं विश्वरूपं प्रपन्नोस्मि किं मे
मृ० ७ सहस्रशीर्षं देवं च व्यक्ताव्यक्तं सनातनं माधवं च

4

प्रपन्नोस्मि किं नो मृ० ८ इत्युदीरितमार्कंडेयः स्तोत्रं
४ तत्र महात्मनः अपक्रांतस्ततो मृत्युर्विष्णुदूतैश्चपीडितः
९ इति तेन जितो मृत्युर्मार्कंडेयेन धीमता प्रसंन्ने पुंडरीका
क्षे नृसिंहे नास्ति दुर्लभं १० मृत्यष्टकमिदं पुण्यं मृत्युप्रश
मनं शुभं मार्कंडेयहितार्थाय स्वयं विष्णुरुवाच ह ११
य इदं पठते भक्त्या त्रिकालं नियतः शुचिः नाकाले तस्य
मृत्युः स्यात् नरस्याच्युतसेवतः १२ हृत्पद्ममध्ये पुरुषं पु
राणं नारायणं शाश्वतमादिदेवं आचिंत्य सूर्यादति राजमा
ने मृत्युं स योगी जितवांस्तदेवं १३ मृत्युं स योगी जित ४

वांस्तदेवोंन्नम इति इति मार्कंडेयपुराणे मृत्यष्टकस्तोत्रं संपू
र्णं ॥ ॥ गुणेशाय नमः ॥ ॥ मयूरेशाय नमः ॥ ॥०
अथ सत्यवती सूनुर्ईष्टुं देवीं परां शिवां विशालाक्षीं द्विजश्रेष्ठो
यत्र संन्निहिता शिवा १ तां दृष्ट्वा विधिवद्भक्त्या संपूज्य च महा
मुनिः परानंदात्मिकां गौरीं स्तुतिं नत्वा चकार सः २ इच्छा
शक्तिः क्रियाशक्तिर्ज्ञानशक्तिस्त्वमेव हि ऋज्वी कुंडलिनी
सूक्ष्मा योगसिद्धिप्रदायिनी ४ ॥१॥ व्यास उवाच ॥
विशालाक्षि नमस्तुभ्यं परब्रह्मात्मिके शिवे त्वमेव माता स
र्वेषां ब्रह्मादीनां दिवौकसः ३ ॥२॥ स्वाहा स्वधा महा

5

विद्यामेधालक्ष्मीः सरस्वती सतीदाक्षायणी विद्यासर्वशक्ति
मयी शिवा ५ अपर्णा चैकपर्णा च तथा विकटपाटला॥
उमा हैमवती चैव कल्याणी चैव मातृका ६ स्तुति प्रज्ञा
महाभागा केैगौरीति मकीर्तिता गणांबिका महादेवी नंदि
नीजातवेदसी ७ सावित्री वरदा पुण्यपाविनी लोकविश्रु
ता मयति नियता रौद्री दुर्गा भद्रा प्रमाथिनी ८ कालरा
त्रिर्महामाया रेवती भूतनायिका गौतमी कौशिकी चार्या
चंडा कात्यायनी शिवा ९ वृषध्वजा शूलधरा परमब्रह्म
चारिणी महेंद्री पेंद्रमाता च पार्वती सिंहवाहिनी १०

एवं स्तुत्वा विशालाक्षीं स्नात्वा गंगांभसौ द्विजाः अश्वमे
धसहस्रस्य फलं प्राप्नोत्यनुत्तमं ११ वाराणस्याः खलु महा
त्म्यं प्रसंगात्किंचिदीरितं यः पठेच्छृणुयाद्वापि याति माहे
श्वरं पदं १२ इति श्री आदित्यपुराणे मानवी संहितायां
वाराणसी महात्म्ये अष्टमोध्यायः॥ ॥छ॥ ॥०॥
श्री॥ वागीश्वर्यै नमः॥ ॥हरिः ॐ॥ ॥ भगवती भगवत्सं
कजं भ्रमरभूतसुरासुरसेवितं स्वजनमानसहंसपरिस्फु
लंकमलया मलयानिमृतं भजे १ त्वावुभाव पिवं देहवि
घ्नेशं कुलदैवतं नरनामगाननस्त्वेको नरसिंहो नरोप

6

ई

रः २ हरिगुरुपदपद्मेहृद्यपद्यानुरागादविजितपरभा
गेसन्निधायादरेण तदनुचरिकरीभिप्रीतयेभक्तिभा
जांभगवतिपदपद्मेपद्यपुष्पाञ्जलिन्ते ३ केनैतेरचि
ताः कुतोविनिहतौशुंभादयोदुर्मदाः केनैतेपततयाखि
लाइतिहतप्रश्नेनकिमाचक्ष्महे ब्रह्माद्याअपिशंकिता
स्त्वद्विषयेयस्याः प्रसादाधिप्रीतास्ता महिषासुरमथमनीलि
[illegible]न्यादवाप्यानिमे ४ पातुश्रीस्तुचतुर्भुजांकिलचुत
वीहोसर्होजाभुजान्यतेष्टादशाधाहिकारणगुणाः कार्येगुणा
रंभकाः सर्यहिकपालिसंख्यदत्तभुजभृच्छंभुस्वयंभूस्वयंधा

ई

तैकप्रतिपत्तयेकिमथवापातुंदशाष्टौदिशः ५ प्रीसष्टा
दशासंमितेषुयुगपच्छीर्षेदातुंवदांरक्षितुंवाभयतोविभर्ति
भगवत्यष्टादशौतान्भुजान् यद्यष्टादशधानुजांस्तुविभ्रतः
कालीसरस्वसुमेमीलितेकमिहानघोस्सुयुतंसासंरभे
रक्षमां ६ अथगद्यपद्यानि अइगिरिनंद्रिनिनंदिन
मेदिनीविश्वविनोदिनिनंन्दनुते गिरिवरविंध्यशिरोधि
निवासिनिविष्णुविलासिनिजिष्णुनुते भगवतिहेशि
तिकंठकुटुंबिनिभूरिकुटुंबिनिभूतिकृते जयजय

हेमहिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते १
७ सुरवरवर्षिणि दुर्द्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शंकरतोषिणि कल्मषशोषिणि घोष
रते दनुजनिरोषिणि दुर्मदशोषिणि शत्रुविशोषिणि सिं
धुसुते ॥ जयजय २ अयि जगदंबकदंबवनप्रियवा
सनिवासिनि हासरते शिषरिशिरोमणि तुंगहिमालयशृं
गनिजालयमध्यगते मधुमधुरे मधुकैटभभंजिनि कैटभ ७
भंजिनि रासरते जयजय ३ अयि निजहंकृति मात्र

निराकृतधूम्रविलोचनधूम्रसुते समरविशोषित
शोणितबीजसमुद्भवशोणितबीजलते शिवशिव ल
शुंभनिशुंभमहाहवतर्प्पितभूतपिशाचपते जजय
जय ४ अयि शतखंडविखंडितरुंडवितुंडितशुं
डगजाधिपते रिपुगजगंडविदारणचंडपराक्रमशौ
डमृगाधिपते निजभुजदंडनिपातितचंडविपाटि
तमुंडभयाधिपते जयजय ५ धनुरणडससंगरण
क्षणसङ्गरणक्षणसङ्गपरिस्फुरदंगरटत्कटके कनक

पिशंगपृषत्कनिषङ्गरसद्भटशृङ्गहतावटुके कृतचतुरंग
बलक्षितिरङ्गघटद्बहुरङ्गरटद्बटुके जयजय ६ अयि
रणदुर्मदशत्रुवधोद्धुरदुर्धर निर्भर शक्तिभृते चतुरवि
चारधुरीणमहाशयदूतकृतप्रमथाधिपते दुरितदु
रीहदुराशयदुर्मददानवदंतहरंतगते॥ जयजय ७ अ
यिशरणागतवैरिवधूवरवीर वराभयदायिकरे त्रि
भुवनमस्तकशूलविरोधिशिरोधिकृतामलशूलकि
रे दुमिदुमितामरदुन्दुभिनादमुहुर्मुखरीकृतदिङ्मकरे

जयजय॥ ८॥ सुरललनाकृततथेइतथेयितथाभिनयो
त्तरनृत्यरते कृतकुकुथःकुकुथोऽद्दादिकतालकुतूह
लगानरते धुधुकुटधुंकुट धिंधिमितिध्वनिधीरमृदंग
निनादरते जयजय ९ जयजयजप्यजये जयश
ब्दपरस्तुतितत्परविश्वनुते झणझण झिंझिमि झिं
कृतनूपुरशिंजितमोहितभूतपते नटितनटार्द्धन
टीनटनायकनायकनाटितनाट्यरते जयजय १०
अयिसुमनस्सुमनस्सुमनस्सुमनस्सुमनोरमकांति
युते श्रितरजनीरजनीरजनीरजनीरजनीकरवक्त्र

कृते स्तनयनविभ्रमर भ्रमर भ्रमर भ्रमर भ्रमर भ्रमर
भ्रमराधिपते ११ महितमहाहवमल्लिमतल्लिक
वल्लिकरल्लिकमल्लिरते विरचितवल्लिकपल्लिकम
ल्लिक झिल्लिक भिल्लिकवर्गवृते श्रितकृतफुल्लसमु
ल्लसितारुणतल्लजपल्लवसल्ललिते जयजय १२
अविरलगण्डगलन्मदमेदुरमत्तमतङ्गजराजपते
त्रिभुवनभूषणभूतकलानिधिरूपपयोनिधिराजसुते
अयिसुदतीजनलालसमानसमोहनमन्मथराजसुते
जयजय १३ कमलदलामलकोमलकान्तिकला

कलितामलभाललते सकलविलासकलानिलयक्र
मकेलिचलत्कलहंसकुले अयिकुलसंकुलकुवलमं
डलमौलिमिलद्बकुलालिकुले जयजय १४ कर
मुरलीरववीजितकूजितलज्जितकोकिलमंजुमते मि
लितमिलिंदमनोहरगुंजितरञ्जितशैलनिकुञ्जगते
निजगणभूतमहाशवरीगणरिंगणसम्भृतकेलिरते ज
यजय १५ कटितटपीतदुकूलविचित्रमयूखतिरस्कृत
चंद्ररुचे प्रणतसुरासुरमौलिमणिस्फुरदंशुलसन्न
खचंद्ररुचे जितकनकाचलमौलिपदोर्जितनिर्ज्ज

रकुञ्जरकुंभकुचे जयजय १६ विजितसहस्रकरैक
सहस्रकरैकसहस्रकरैकनुते कृतसुरतारकसंगरक
संगरतारकसूनुनुते सुरथसमाधिसमानसमाधिस
मानसमाधिसमाधिरते जयजय १७ पदकमलंक
रुणानिलयेवरिवस्यतियोनुदिनंसशिवे अयिकमले
कमलानिलयःकमनिलयःसकथंनभवेत् तवपदमे
वपरंपदमित्युनिशीलयतोमम किंनशिवे जयजय १८
कनकलसत्कलशीकजलैरनुसिंचतितेगुणरंगभुवम् भ
जतिसकिंनुशचीकुचकुंभतटीपरिरंभसुखानुभवम्

तवविमलेंदुकलंवदनेंदुमलयन्चनुकूलयते कि
मुपुरुहूतपुरेंदुमुखीसुमुखीभिरसौविमुखीक्रि
यते ममतुमतंशिवमानधेभवतीकृपया कि
मुनाक्रियते जयजय १९ अयिमयिदीनद
यालुतयाकृपयेवतयाभवितव्यमुमे अयिजग
तोजननीतियथासिममासितथानुमितासिरमे
।यदुचितमत्रभवत्पुररीकुरुतादुरुतापमपाकुरु
मे जयजय २० स्तुतिमितिस्तिमितःसुसमाधि
नानियमितीयमतोनुदिनंपठेत् परमयारमयास

॥

निसेव्यते परिजनो रिनी पिच तं भजेतु २२ इति
पद्यपुष्पांजलिस्तव इति रामकृष्ण कविना [illegible]
विरचितं पद्यपुष्पांजलिस्तोत्रं संपूर्णं ॥ श्री ॥

12